# संस्कृतवार्ता:

दिनाङ्क :  28/01/2025 सायम्  - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ता: श्रूयन्ताम्

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् पूर्वभारतं देशस्य विकासस्य यन्त्रम् अस्ति ओडिशा च अस्य महत्त्वपूर्ण: भाग: अस्ति इति।
- राजनैतिकदलानि देहलीनगरे विधानसभा-निर्वाचनस्य प्रचाराभियाने तीव्रतां भजन्ते।
- श्व: मौनी अमावस्याया: दृष्ट्या प्रयाग्राज्-नगरस्य महा-कुम्भमेलायां विस्तृता व्यवस्था कृतास्ति।
- भारतदेशेन श्रीलंकाया: नौसेनाद्वारा धीवरसंबद्ध-प्रकरणे गुलिकाप्रहारस्य निंदा कृता।
- सम्पूर्णे बाङ्ग्लादेशे, रेलसेवा: स्थगिता: सन्ति, यतो हि रेलकर्मचारिण: अनिर्दिष्टकालीयम् कार्यावरोधात्मकम् आन्दोलनं कुर्वन्त: सन्ति।

------------------------------------

प्रधानमन्त्री-ओडिशा

प्रधानमन्त्री नरेन्द्रमोदी अद्य समुदीरितवान् यत् भारतदेश: कोटिश: जनानां आकांक्षाभि: विकासपथे अग्रसरो अस्ति। श्री मोदी भुवनेश्वरनगरे 'उत्कर्ष ओडिशा, मेक-इन-ओडिशा कान्क्लेव' इत्यस्य उद्घाटनानन्तरं जनसमूहं सम्बोधयन् आसीत्। उत्कर्ष-ओडिशा इति ओडिशा-सर्वकारेण आयोजितं प्रमुखं वैश्विक-निवेश-शिखरसम्मेलनम् अस्ति। प्रधानमन्त्री प्राबल्येन प्रतिपादितवान् यत् ए. आई. इति पदम् कृत्रिम-बुद्धिमत्ताय अथ "एस्पाइरेशन् ऑफ़ इन्डिया" इति भावात्मक: अस्ति भारतस्य आकांक्षा: चेत्येतयो: द्वयो: अर्थयो: प्रतिपत्ति विदधाति यो हि देशस्य शक्तिरुपेण संस्थित: अस्ति।

ओडिशा-राज्यं शीघ्रमेव औद्योगिकविकासस्य प्रतीकम् भविष्यति यत् एकस्मिन् समये कल्पनातीतम् आसीत्। प्रधानमन्त्री प्रावोचत् यत् भारतं विश्वस्य तृतीयं बृहत्तमं अर्थव्यवस्था निर्मातुं ओडिशा-राज्यस्य भूमिका अतीमहत्त्वपूर्णा अस्ति । श्री मोदी अवदत् यत् ओडिशा-राज्यस्य अथ राज्यजनानां च क्षमतायां तस्य विश्वासः अस्ति येन ओडिशाराज्यं सर्वेषु राज्येषु द्रुतगत्या वर्धमानेषु अर्थव्यवस्थासु अन्यतमं भविष्यति। निवेशकान् सम्बोधयन् प्रधानमन्त्री ओडिशा-राज्ये सूक्ष्म-लघु-मध्यमोद्योग-संस्थानां, युवानां स्टार्ट-अप्-उपक्रमाणां, शोध अथ नवचार क्रियाकलापानां च समर्थनं कर्तुं निवेशकेभ्यः उद्योगपतिभ्यः च आहूतवान् यतो हि तस्य सर्वकारः अस्मिन् कार्ये तेभ्यः सर्वं साहाय्यं प्रदास्यति। सः एतेषु क्षेत्रेषु खाद्य प्रसंस्करणं, जीवश्मतैल-रसायनं, मत्स्यायनं, सूचनाप्रौद्योगिकी, वस्त्रोद्योगं, उत्खननं चेत्येतेतानां क्षेत्राणां परिगणितः। श्रीमोदी अनुसंधानस्य नवाचारस्य च जीवन्तव्यवस्थायाः निर्माणाय सर्वकारस्य प्रतिबद्धतां पुनःप्रतिपदितवान् अपि च उद्यमान् अस्मिन् प्रयासे सर्वकारेण सह उद्योगान् सहयोगं कर्तुं आमन्त्रितवान् इति ।

प्रधानमन्त्री उक्तवान् यत् एकविंशति शताब्द्यां ओडिशाराज्यं अस्य समृद्ध- एतिह्यस्य पुनरुद्भवनं करोति, अपि च वाणिज्यक्षेत्रे सांस्कृतिकक्षेत्रे च संबंधान् निर्मातुं आसियान् देशानां रुचिमपि आरेखितवान्।

-----------------------------------

## दिल्ली-निर्वाचनम्

यथायथं दिल्लीप्रदेशस्य मतदानस्य दिनाङ्कः आसन्नः जायमानोऽस्ति राष्ट्रिय-राजधान्यां राजनैतिकसंघर्षः तीव्रतां भजते सप्तति सदस्यानां दिल्ली-विधानसभा-निर्वाचनस्य प्रचारः सजवं प्रचलति। भाजपा-दलस्य वरिष्ठः नेता तथा केन्द्रीय-गृहमन्त्री अमितशाहः अद्य बदरपुर-कस्तूरबा-नगर-निर्वाचनक्षेत्रयोः मार्गीयसभां कुर्वन् अस्ति। श्रीशाहः कालकाजीक्षेत्रे जनसभाम् अपि सम्बोधयिष्यति। भाजपेति दलेन अद्य सांसद-मनोजतिवारी इत्यनेन गीतं अपि चक्रि निर्वाचन-प्रचार-गीतं लोकार्पितम्, यत् दलस्य निर्वाचन-घोषणापत्रस्य विभिन्नान् पक्षान् प्रतिबिम्बयति। आम् आद्मी-दलस्य राष्ट्रिय-संयोजकः अरविन्द-केज्रीवालः अद्य सायङ्काले घोण्डा-करावल-नगरयोः जनसभां करिष्यति। आप-दलस्य वरिष्ठः नेता तथा पञ्जाब्-राज्यस्य मुख्यमन्त्री भगवन्त् मान् अपि मार्गीय-सभां कृत्वा नगरस्य विभिन्नेषु भागेषु जनसभाः सम्बोधयिष्यति। स्वस्याः सार्वजनिकसभायाः प्राक्, काङ्ग्रेस्-दलस्य वरिष्ठः नेता राहुलगान्धी अद्य गोलमार्किट इति क्षेत्रे वाल्मीकि-मन्दिरे प्रार्थनां कृतवान्, हरिजन-बस्ती इत्यत्र स्थानीयजनान् अपि मिलितवान्। सः अद्य सायङ्काले पड़पड़गञ्ज ओखला विधानसभाक्षेत्रयोः जनसभां सम्बोधयिष्यति। अन्यः काङ्ग्रेस्-नेता सचिन् पायलटः स्वपक्षस्य अभ्यर्थिनां कृते जनानां समर्थनं प्राप्तुं बादली-क्षेत्रे यात्रिकसभां करिष्यति। दिल्ली-विधानसभायाः निर्वाचनं फेब्रुवरी-मासस्य पञ्चमे दिनाङ्के भविष्यति, गणना च फेब्रुवरी-मासस्य अष्टमे दिनाङ्के भविष्यति।

-----------------------------------

## महाकुम्बः-मौनी अमावास्यः

अथ महाकुम्भ-वार्ता:।

इदानीं महा-कुम्भमेलायाः वार्ता:। उत्तरप्रदेश-सर्वकारः भक्तानां सुरक्षां निश्चेतुं श्वः मौनी-अमावस्यायाः दृष्ट्या प्रयागराज-नगरस्य महाकुंभे सुरक्षा-व्यवस्थां महत्त्वपूर्णरूपेण वर्धितवान् अस्ति। सर्वकारेण सप्तस्तरीया सुरक्षा-व्यवस्था कार्यान्वितास्ति। महाकुंभक्षेत्रं नो-वि.आई. पि. इति क्षेत्रत्वेन निर्दिष्टम् इति अस्माकं वार्ता हरः सूचितवान्।। सुरक्षां संरक्षां च निश्चेतुं अर्धसनिकबलानि समेत्य पञ्चाशत् सहस्राधिकाः आरक्षकाः अपि नियोजिताः सन्ति। आरक्षक-महानिरीक्षकः, राजीव नारायण मिश्रः अवदत् यत् सङ्गम इत्यत्र जलस्य अधः क्रियायाः निरीक्षणार्थं प्रथमवारं जलान्तर्गामिनः ड्रोन्स् इति उपकरणानि नियुक्तानि सन्ति इति। उत्तरप्रदेश-सर्वकारः मौनी-अमावस्यायां प्रायः दश कोटि-भक्तानां जनसम्मर्दं प्रतीक्षते। मौनी-अमावस्यायाः अमृत-स्नानस्य कृते भक्तानां सुरक्षितं निर्विघ्नं च गमनं सुनिश्चितं कर्तुं मेलक-प्रशासनं कस्यापि प्रयत्नस्य त्यागः न करोति।

-----------------------------------

<u>बागपत-मोदकोत्सवः</u>

उत्तरप्रदेशे अद्य बागपत्-नगरे भगवान्-आदिनाथस्य 'निर्वाण-लड्डु-उत्सवं' इत्यस्य अस्थायि-मञ्चस्य पतने जाते साम्मर्दिक-ऊहापोहे न्यूनातिन्यूनं सप्तजनाः मृताः, पञ्चचत्वारिंशतः अधिकाः जनाः व्रणिताः च अभवन्। यदा भक्ताः धार्मिकसमारोहे भागं ग्रहीतुं मञ्चं आरूढवन्तः तदा एषा घटना घटिता, येन स्थले अराजकता, आतङ्कश्च अभवत्। सम्मर्दे बहवः ग्रामीणाः व्रणिताः इति वार्ताहरः सूचितम्। बागपत्-मण्डल-दंडाधिकारिणी अस्मितालाल् इत्येषा सूचितवती यत् साम्प्रतं यावत् सप्तजनाः मृताः पञ्चचत्वारिंशत् व्रणिताः जनाश्च बरौत्-नगरस्य विभिन्नेषु चिकित्सालयेषु उपचाराय सन्तीति।

प्रसङ्गेस्मिन् उद्धारकार्याणि चलायमानानि सन्ति। मुख्यमन्त्री योगी आदित्यनाथ्-वर्यः अधिकारिभ्यः साहाय्यकार्याणि त्वररया कर्तुं, व्रणितानां समुचितचिकित्सां च सुनिश्चेतुं निर्देशं अददात्।

-----------------------------------

<u>बाङ्ग्लादेशस्य प्रशिक्षणसेवाः</u>

सम्पूर्णे बाङ्ग्लादेशे, रेलसेवाः स्थगिताः सन्ति, यतो हि साम्प्रतिकाः कर्मचारिणः सेवा निवृत्तेः अनन्तरं विशेषलाभार्थं अनिर्दिष्टकालीयम् आन्दोलनं कुर्वन्तः सन्ति। सोमवासरे मध्यरात्रौ रेल्-अधिकारिणां रेल्यान् -चालकानां सहायक-कर्मचारिणां च सङ्घस्य मध्ये वार्तालापः असफलः अभवत्। परिणामतः, मध्यरात्र्याः अनन्तरं निर्गन्तुं निर्धारितानि रेलयानानि निरस्तानि, येन सम्पूर्णे देशे रेलयानप्रचालनं स्थगितम्।

-----------------------------------

<u>बीटिङ्ग् रिट्रीट् समारोहः</u>

श्वः नवदेहल्याः विजय् चौक् इत्यत्र बीटिङ्ग् रिट्रीट् इति समारोहः भविष्यति। एकस्मिन् वक्तव्ये, रक्षामन्त्रालयः अवदत् यत्, अस्मिन् वर्षे त्रिंशत प्रदर्शनानि सेना, नौसेना, वायुसेनायाः, केन्द्रीय-सशस्त्र-आरक्षक-बलस्य च वाद्यवृन्दानां भविष्यन्ति, येन प्रेक्षकाणां श्रोतृणाञ्च सम्मोहनं भविष्यति। अस्मिन् समारोहे राष्ट्रपतिपदासीना द्रौपदी मुर्मू, उपराष्ट्रपति जगदीप धनखडः, प्रधानमन्त्री नरेन्द्रमोदी, रक्षामन्त्री राजनाथसिंहः, अन्ये केन्द्रीयमन्त्रिणः च सम्मिलिताः भविष्यन्ति। अस्य समारोहस्य आरम्भः प्रसिद्धेन कदम् कदम् बढाये जा इति गीतध्वनिना भविष्यति, तदनन्तरं अमर् भारती, इन्द्रधनुष्, जय् जनम् भूमि, इत्यादयः सुमधुरध्वनयः श्रावयिष्यन्ते।

-----------------------------------

<u>श्रीलंका-धीवर</u>

भारतदेशेन श्रीलंकायाः नौसेनाद्वारा धीवरसंबद्ध-प्रकरणे गुलिकाप्रहारस्य निंदा कृता। विदेशमंत्रालयेन अद्य श्रीलंकादेशस्य कार्यकारी उच्चायुक्ताय उपस्थिति-निर्देशं प्रख्यापितम् यत्र मंत्रालयेन अद्य प्रातः काले डेल्फ़्ट् द्वीपस्य समीपे त्रयोदश-धीवराणां सम्मुखे गुलिकाप्रहारस्य प्रकरणं समुत्थापितम्।

-----------------------------------

<u>जयशङ्करः</u>

अबुधाबी मध्ये आयोजिते उद्घाटन रायसीना संवाद इति कार्यक्रमस्य उद्घाटनावसरे विदेशमन्त्री डॉ. जयशंकरः भारत-मध्य-पूर्व क्षेत्रीयदेशौः सह वर्धमानसम्बन्धानां महत्वं प्रत्यपादयत्। व्यापारस्य, सम्पर्कस्य, सांस्कृतिकसम्बन्धानां च दशकाभ्यन्तरे जायमानां वृद्धिं प्रकाशयन्, अद्यत्वे परिवर्तमाने वश्विक-परिदृश्ये सहभागित्वम् महत्त्वपूर्णम् अस्तीत सः अवोचत्। डा. जयशङ्करः प्रधानमन्त्रिणः मोदिनः दूरदृष्टिं स्मृतवान् येन रसिना-संवाद प्रारब्धः, येन वश्विक-चर्चासु भारतस्य भूमिका च वर्धिता।

-----------------------------------

<u>क्रिकेट्ः</u>

अन्तः एकोनविंशतिवर्षीयाणां महिलानां टी-20 इति विश्वचषक-क्रीडायां अद्य अपराह्णे मलेशिया-देशस्य क्वालालम्पुर्-नगरे सुपर्-सिक्स्-इति क्रीडायां भारतं स्काट्लण्ड्-देशम् सार्धैकशतम् धावनांकः पराजयत्। नवाधिकद्विशतधावनाङ्कान् अनुधावन् स्काट्लण्ड्-देशः चतुर्दश-कन्दुक-प्रक्षेपणचक्रेषु केवलं अष्टपञ्चाशत् धावनाङ्कान् विरच्य समाप्ता अभवत्। पुरुष-क्रिकेट्-क्रीडायां अद्य गुजरात्-राज्यस्य राज्कोट्-नगरे तृतीयायां टि-20-इति अन्ताराष्ट्रिय-क्रीडायां भारतं

इङ्ग्लेण्ड्-देशेन सह क्रीडिष्यति। क्रीडा सायं सप्तवादने आरभ्यते। सूर्यकुमार् यादव् इत्यस्य नेतृत्वे भारतीयदलम् पञ्च-क्रीडा-श्रृङ्खलायां द्वि-शून्येन अग्रे अस्ति।

।। इति वार्ता:।।